||नमो नमः||

# || आचार्य चतुर्थ सेमेस्टर सौन्दर्य लहरी प्रश्नोत्तर||


डा.नीरज तिवारी

अस्सिटेन्ट प्रोफेसर ,साहित्य विभाग

राष्ट्रिय संस्कृत संस्थान (मानितविश्वविद्यालय)

लखनऊ परिसर, लखनऊ

Emal. neerajtiwaribhu@gmail.com

Mo.no.9450530774

# ॥ सौन्दर्यलहरी ॥
# (अवशिष्टानि प्रश्नोत्तराणि)
## ॥ प्रतिप्रश्नं २ अङ्कौ ॥

१. घनस्निग्धश्लक्ष्णम् इति कः समासः ?

बहुव्रीहिसमासः॥

२. चञ्चुजडिमा इत्यत्र कः प्रत्ययः ?

पृथ्वादित्वात् इमनिच्॥

३. मुक्तामणिधरः। कः विग्रहः ?

मुक्ताभिः मणिः मुक्तामणिः। मुक्तामणिं धरति इति मुक्तामणिधरः॥

४. विपञ्च्या का गायन्ती ?

वाणी विपञ्च्या गायन्ती॥

५. सिन्दूरं वहन्ती का ?

शक्तिः॥

६. धनुः शौनासीरं किम् ?

इन्द्रधनुः॥

७. गगनमणिभिः इति कः विग्रहः ?

गगनम् एव मणयः, तैः गगनमणिभिः॥

८. का क्षेमं तनोतु ?

तनोतु क्षेमं नस्तव वदनसौन्दर्यलहरी॥

९. न निबध्नाति धिषणाम्। किम् ?

धनुः शौनासीरं न निबध्नाति धिषणाम् ॥

१०. किरीटं ते हिमगिरिसुते कीदृशम् ?

गगनमणिभिः सान्द्रघटितं किरीटं ते हैमं हिमगिरिसुते॥

११. कं नवात्मानं मन्यते ?

नवरसमहाताण्डवनटनवात्मानं मन्यते॥

१२. औपम्यरहितं किम् ?

चुबुकमौपम्यरहितम्॥

१३. माणिक्यवपुषा। कः विग्रहः ?

माणिक्यरूपं वपुः माणिक्यवपुः। तेन माणिक्यवपुषा॥



१४. हारलतिका। कः विग्रहः ?

हारो लतिका इव॥

१५. सारस्वतमिव। कः अलङ्कारः ?

उत्प्रेक्षा।

१६. शबलिताम्। कः अर्थः ?

मिश्ररङ्गाम्॥

१७. हेरम्बः। कः अर्थः ?

गणेशः॥

१८. वक्षोजौ कीदृशौ ?

वक्षोजौ अमृतरसमाणिक्यकुतुपौ॥

१९. पुरदमयिता कः ?

शिवः॥

२०. कलया किं साम्यं भजतु ?

कलया कमलं साम्यं भजतु ॥

२१. सरसिजभवः कः ?

ब्रह्मा॥

२२. भुजलतानाम्। कः अलङ्कारः?

रूपकालङ्कारः॥

## ॥ प्रतिप्रश्नं ५ अङ्काः ॥

१. सनाथाभ्यां जज्ञे। कथम् ?

तवाधारे मूले सह समयया लास्यपरया नवात्मानं मन्ये नवरस-महाताण्डवनटम्। उभाभ्यामेताभ्यामुदयविधिमुद्दिश्य दयया जनकजननी-मज्जगदिदं सनाथाभ्यां जज्ञे। गतैर्माणिक्यत्वं गगनमणिभिः सान्द्रघटितं किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः। स नीडेयच्छायाच्छुरणशबलं चन्द्रशकलं धनुः शौनासीरं किमिति न निबध्नाति धिषणाम्। धुनोतु ध्वान्तं नस्तुलितदलितेन्दीवरवनं घनस्निग्धश्लक्ष्णं चिकुरनिकुरुम्बं तव शिवे। यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसो वसन्त्यस्मिन्मन्ये वलमथनवाटी-विटपिनाम्। तनोतु क्षेमं नस्तव वदनसौन्दर्यलहरी परीवाहः स्रोतःसरणि-रिव सीमन्तसरणिः। सिन्दूरं वहन्ती प्रबलकबरीभारतिमिरद्विषां बृन्दैर्बन्दी-कृतमिव नवीनार्ककिरणम्॥

२. शक्तेः मुखसौन्दर्यं वर्णयत।

अरालैः स्वाभाव्यादलिकलभसश्रीभिरलकैः परीतं ते वक्त्रं परिहसति पङ्केरुहरुचिम्। दरस्मेरे यस्मिन्दशनरुचिकिञ्जल्करुचिरे सुगन्धौ माद्यन्ति स्मरदहनचक्षुर्मधुलिहः। ललाटं लावण्यद्युतिविमलमाभाति तव यद् द्वितीयं तन्मन्ये मकुटघटितं चन्द्रशकलम्। विपर्यासन्यासादुभयमपि संभूय च मिथः सुधालेपस्यूतिः परिणमति राकाहिमकरः। भ्रुवौ भुग्ने किंचिद्भुवनभयभङ्गव्यसनिनि त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणम्। धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तरमुमे। अहः सूते सव्यं तव नयनमर्कात्मकतया त्रियामां वामं ते सृजति रजनीनायकतया। तृतीया ते दृष्टिर्दरदलितहेमाम्बुजरुचिः समाधत्ते सन्ध्यां दिवसनिशयोरन्तरचरीम्॥

३. शक्तिः कथं विजयते इति प्रतिपादयत।

विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः कृपाधाराधारा किमपि मधुराभोगवतिका। अवन्ती दृष्टिस्ते बहुनगरविस्तारविजया ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते। कवीनां संदर्भस्तबकमकरन्दैकरसिकं कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलम्। अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वादतरला वसूयासंसर्गादलिकनयनं किंचिदरुणम्।

शिवे शृङ्गारार्द्रा तदितरजने कुत्सनपरा सरोषा गङ्गायां गिरिशचरिते विस्मयवती। हराहिभ्यो भीता सरसिरुहसौभाग्यजननी सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा। गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती पुरां भेत्तुश्चित्तप्रशमरसविद्रावणफले। इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके तवाकर्णाकृष्टस्मरशरविलासं कलयतः॥

४. कथं त्रिगुणाः शक्तौ प्रवर्तन्ते इति विशदयत।

विभक्तत्रैवर्ण्यं व्यतिकरितलीलाञ्जनतया विभाति त्वन्नेत्रत्रितयमिद-मीशानदयिते। पुनः स्रष्टुं देवान्द्रुहिणहरिरुद्रानुपरतान् रजः सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिव। पवित्रीकर्तुं नः पशुपतिपराधीनहृदये दयामित्रै-र्नेत्रैररुणधवलश्यामरुचिभिः। नदः शोणो गङ्गा तपनतनयेति ध्रुवममुं त्रयाणां तीर्थानामुपनयसि संभेदमनघम्। निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती तवेत्याहुः सन्तो धरणिधरराजन्यतनये। त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः परित्रातुं शङ्के परिहृतनिमेषास्तव दृशः। तवापर्णे कर्णेजपनयनपैशुन्यचकिता निलीयन्ते तोये नियतमनिमेषाः शफरिकाः। इयं च श्रीर्बद्धच्छदपुटकवाटं कुवलयं जहाति प्रत्यूषे निशि च विघटय्य प्रविशति॥

५. भक्तस्य शक्तिवन्दनं संक्षिपत।

दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा दवीयांसं दीनं स्नपय कृपया मामपि शिवे अनेनायं धन्यो भवति न च ते हानिरियता वने वा हर्म्ये वा समकरनिपातो हिमकरः। अरालं ते पालीयुगलमगराजन्यतनये न केषामाधत्ते कुसुमशरकोदण्डकुतुकम्। तिरश्चीनो यत्र श्रवणपथमुल्लङ्घ्य विलसन्नपाङ्गव्यासङ्गो दिशति शरसंधानधिषणां स्फुरद्गण्डाभोग-प्रतिफलिताटङ्कयुगलं चतुश्चक्रं मन्ये तव सुखमिदं मन्मथरथम्। यमारुह्य द्रुह्यत्यवनिरथमर्केन्दुचरणं महावीरो मारः प्रमथपतये सज्जितवते॥

६. भक्तानां प्रार्थनाफलं साधयत।

सरस्वत्याः सूक्तीरमृतलहरीकौशलहरीः पिबन्त्याः शर्वाणि श्रवण-चुलुकाभ्यामविरलं चमत्कारश्लाघाचलितशिरसः कुण्डलगणो झणत्कारै-स्तारैः प्रतिवचनमाचष्ट इव ते। असौ नासावंशस्तुहिनगिरिवंशध्वजपटि त्वदीयो नेदीयः फलतु फलमस्माकमुचितम्। वहत्यन्तर्मुक्ताः शिशिरकरनिश्वासगलितं समृद्ध्या यत्तासां बहिरपि च मुक्तामणिधरः। प्रकृत्या रक्तायास्तव सुदति दन्तच्छदरुचेः प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता न बिम्बं तद्बिम्बप्रतिफलनरागारुणितं तुलामध्यारोढुं कथमिव विलज्जेत कलया। स्मितज्योत्स्नाजालं तव वदनचन्द्रस्य पिबतां चकोराणामासीदतिरसतया चञ्चुजडिमा। अतस्ते शीतांशोरमृतलहरी-माम्लरुचयः पिबन्ति स्वच्छन्दं निशिनिशि भृशं काञ्जिकधिया॥

७. वाणी कथं निजां वीणां निचुलयतीति विशदयत।

अविश्रान्तं पत्युर्गुणगणकथाम्रेडनजपा जपापुष्पच्छाया तव जननि जिह्वा जयति सा। यदग्रासीनायाः स्फटिकदृषदच्छच्छविमयी सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा। रणे जित्वा दैत्यानपहृतशिरस्त्रैः कवचिभिर्निवृत्तैश्चण्डांशत्रिपुरहरनिर्माल्यविमुखैः। विशाखेन्द्रोपेन्द्रैः शशि-विशदकर्पूरशकला विलीयन्ते मातस्तव वदनताम्बूलकबलाः। विपञ्च्या गायन्ती विविधमपदानं पशुपतेस्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने। तदीयैर्माधुर्यैरपलपिततन्त्रीकलरवां निजां वीणां वाणी निचुलयति चोलेन निभृतम्॥

८. शक्तेः सौन्दर्यं सरसिजभवः वदनैः कथं स्तौति ?

कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया गिरीशेनोदस्तं मुहुरधरपानाकुलतया। करग्राह्यं शंभोर्मुखमुकुरवृन्तं गिरिसुते कथंकारं ब्रूमस्तव चुबुकमौपम्यरहितम्। भुजाश्लेषान्नित्यं पुरदमयितुः कण्टकवती तव ग्रीवा धत्ते मुखकमलनालश्रियमियम्। स्वतः श्वेता कालागुरुबहुलजम्बाल-मलिना मृणालीलालित्यं वहति यदधो हारलतिका। गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे विवाहव्यानद्धप्रगुणगुणसंख्याप्रतिभुवः।

विराजन्ते नानाविधमधुररागाकरभुवां त्रयाणां ग्रामाणां स्थिति-नियमसीमान इव ते मृणालीमृद्वीनां तव भुजलतानां चतसृणां चतुर्भिः सौन्दर्यं सरसिजभवः स्तौति वदनैः। नखेभ्यः संत्रस्यन्प्रथममथना-दन्धकरिपोश्चतुर्णां शीर्षाणां सममभयहस्तार्पणधिया॥

९. कवीनां प्रौढानामजनि कमनीयः कवयिता। कथमिति साधयत।

नखानामुद्योतैर्नवनलिनरागं विहसतां कराणां ते कान्तिं कथय कथयामः कथमुमे। कयाचिद्वा साम्यं भजतु कलया हन्त कमलं यदि क्रीडल्लक्ष्मीचरणतललाक्षारसचणम्। समं देवि स्कन्दद्विपवदनपीतं स्तनयुगं तवेदं नः खेदं हरतु सततं प्रस्नुतमुखम्। यदालोक्याशङ्काकुलितहृदयो हासजनकः स्वकुम्भौ हेरम्बः परिमृशति हस्तेन झडिति। अमू ते वक्षोजावमृतरसमाणिक्यकुतुपौ न संदेहस्पन्दो नगपतिपताके मनसि नः। पिबन्तौ तौ यस्मादविदितवधूसङ्गरसिकौ कुमारावद्यापि द्विरदवदनक्रौञ्च-दलनौ। वहत्यम्ब स्तम्बेरमदनुजकुम्भप्रकृतिभिः समारब्धां मुक्तामणिभि-रमलां हारलतिकाम्। कुचाभोगो बिम्बाधररुचिभिरन्तः शबलितां प्रताप-व्यामिश्रां पुरदमयितुः कीर्तिमिव ते। तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः पयःपारावारः परिवहति सारस्वतमिव। दयावत्या दत्तं द्रविडशिशु-रास्वाद्य तव यत् कवीनां प्रौढानामजनि कमनीयः कवयितुः॥